# Devi Stotram

# देवीस्तोत्रम्

## Document Information

Text title : Devi Stotram

File name : devIstotramshrIdharasvAmI.itx

Category : devii, shrIdharasvAmI, stotra, aShTaka

Location : doc_devii

Author : Shridharasvami

Description/comments : shrIdharasvAmI stotraratnAkara

Acknowledge-Permission: Upendra Shripad Dasare, https://shridharamrut.com

Latest update : November 8, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

November 13, 2022

*sanskritdocuments.org*

# देवीस्तोत्रम्

(शिखरिणी वृत्तम)
श्री पराविद्यारूपां निगमवनशोभां स्मरहरां
परब्रह्माकारां निजकरुणदृष्ट्याऽवनकराम् ।
कृपापाङ्गां शान्तां दिविजनगणसंसेव्यचरणां
चिदानन्दां देवीं मुनिजननुतां नौमि सततम् ॥ १॥

रमोमावाणीति त्रिविधमपि रूपं तव शुभे
परब्रह्माकारं प्रकटयति सच्चिसुखपदैः ।
शिवे! स्मारं स्मारं तव विमलरूपं निजसुखं
नये कालं मातः! श्रुतिमथिततत्त्वार्थकलितः ॥ २॥

न रूपं नो लिङ्गं श्रुतिषु गदितं ब्रह्मण इति
परं स्वार्थाय त्वां मम जननि! साम्बोध्य कलये ।
भवे! पुत्रस्नेहादवसिहि ममाशेयमखिला
यथा मातृस्नेहो विदित इति नो ब्रह्म च तथा ॥ ३॥

त्रयाणां लिङ्गानां श्रुतिषु तव नामानि विमले!
परं मातृस्नेहादचिनवमिद वै स्वहितदमी ।
यथा माता स्निह्येत्तदपि मयि ते प्रीतिरधिका
न माता ब्रह्मैक्यं किल वितनुते त्वं न च तथा ॥ ४॥

अपि ब्रह्मकारादपि च निजशक्तेर्विभवतः
न मातस्त्वच्छ्रेष्ठं किमपि किल जाने स्फुटमिदम् ।
यया शक्त्या कोऽपि प्रभवति च सा त्वं भवहरे
त्वमेवैकं ब्रह्मस्वयमभिहिन्तं भेदरहितम् ॥ ५॥

सदेकं ते रूपं बहुविधतया वेदकथितं
स्वभक्त्या सेवन्ते सकलजनसौख्यं वितनुषे ।
त्वमेका विश्वादौ त्वमिह सकलान्तर्बहिरपि

त्वमेवैका चान्ते सकलमुपसंहृत्य रमसे ॥ ६॥

त्वमिन्द्रस्त्वं ब्रह्मा रविरपि च चन्द्रो हरिहरौ
नरस्त्वं नारी त्वं सकलदिविजा देव्य इति यः ।
धृतिः प्रज्ञा मेधा मतिरपि गतिस्त्वं श्रुतिनुते!
त्वमेवं यद्भूतं भवदिति भविष्यत्तदपि च ॥ ७॥

यथाब्धौ फेनः स्यात्त्वयि जगदिदं यज्जडमिति
तरङ्गं कल्लोलस्त्वयि जननि! चेशोऽपर इमौ ।
यथाब्धिः स्यादेकस्त्रिभिरपि च रूपैर्भवनुदे!
त्वमेका चिन्मात्रा सुखजलधिरेभिस्त्रिभिरपि ॥ ८॥

देवीस्तोत्रमिदं पुण्यं पवित्रं भूवि पावनम् ।
पावयत्यखिलाञ्जीवान् गङ्गेव किल सर्वदा ॥ ९॥

इति श्रीसमर्थरामदासानुगृहीतरामपदपकञ्जभृङ्गायमान-
श्रीमत्परमहंसपरिव्राजकाचार्य भगवता श्री श्रीधरस्वामिना
विरचितं श्रीदेवीस्तोत्रं सम्पूर्णम् ॥

---

*Devi Stotram*

pdf was typeset on November 13, 2022

Please send corrections to *sanskrit@cheerful.com*